# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा- ऑक्टोबर-२०१९

| | | |
|---|---|---|
| कक्षा-**आचार्य-१ सेमेस्टर-१(New)** | **प्रश्नपत्रम् - २** | गुणाः - ७० |
| विषयः - नव्यव्याकरणम् | कोड – C.C.4.1.1 | समयः - ८:०० तः ११:०० |
| दिनाङ्कः – १०/१०/२०१९ | ग्रन्थः – व्याकरणमहाभाष्यम् | |

---

**प्रथमान्वितिः (युनिट - १)**

**प्रश्नः १ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं लेख्यम्** **05**

१. सर्व-शब्दस्य सर्वनामसंज्ञाप्रापणाय भाष्ये सूचितम् उपायं विवृणुत।

२. 'संज्ञोपसर्जनप्रतिषेधः' इति वार्त्तिकं विवृणुत।

**प्रश्नः २ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम्** **10**

१. उभशब्दस्य सर्वनामत्वे प्रयोजनं स्पष्टीकुरुत।

२. 'विभाषा दिक्समासे बहुव्रीहौ' इति सूत्रं भाष्यानुसारं व्याख्येयम्।

**द्वितीयान्वितिः (युनिट - २)**

**प्रश्नः ३ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं लेख्यम्** **05**

१. 'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्' इत्येतत् सूत्रं व्याख्येयम्

२. 'स्वरादिनिपातमव्ययम्' इति सूत्रं व्याख्येयम्।

**प्रश्नः ४ कस्यापि एकस्य सूत्रस्य भाष्यानुसारिणी व्याख्या विधेया** **10**

१. न वेति विभाषा।

२. कृन्मेजन्तः।

**तृतीयान्वितिः (युनिट - ३)**

**प्रश्नः ५ कस्यापि एकस्य सूत्रस्य भाष्यानुसारिणी व्याख्या विधेया** **05**

१. एच इग्घ्रस्वादेशे।

२. इग्यणः सम्प्रसारणम्।

**प्रश्नः ६ कस्यापि एकस्य सूत्रस्य भाष्यानुसारिणी व्याख्या विधेया** **10**

१. आद्यन्तौ टकितौ।

२. मिदचोऽन्त्यात् परः।

**चतुर्थान्वितिः (युनिट - ४)**

**प्रश्नः ७ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं लेख्यम्** **05**

१. आदेः परस्य।

२. अलोऽन्त्यस्य।

**प्रश्नः ८ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम्** **10**

१. षष्ठी स्थानेयोगा।

२. स्थानेऽन्तरतमः।

**प्रथमान्वितितः चतुर्थान्वितिः (युनिट - १-४)**

**प्रश्नः ९ केषामपि दशानाम् एकैकवाक्यैः उत्तराणि लेख्यानि** **10**

१. सर्वनामशब्दे णत्वं कस्मात् न भवति?

२. 'सर्वो नाम कश्चित्, तस्मै सर्वाय देहि' इत्यत्र सर्वशब्दस्य सर्वनामसंज्ञा कस्मान्न प्राप्नोति?

३. स्वशब्दः केषु अर्थेषु प्रसिद्धः?

४. अव्ययसर्वनाम्नामकच्प्राक्टेः इति सूत्रेण कः आगमः क्रियते?

५. अन्तरायां पुरि इत्यत्र सर्वनामसंज्ञाप्रतिषेधः केन सूत्रेण भवति?

६. प्रियविश्व-शब्दस्य चतुर्थी-एकवचनान्तं रूपं किं भवति?

७. दिग्वाचकबहुव्रीहिसमासविधायकं सूत्रं किम्?

८. गणे पठितानां पूर्वादीनां सूत्रपाठे पुनः पठनस्य किं प्रयोजनम्?

९. कृद्यो मान्तः तस्य का संज्ञा भवति?

१०. निपातसंज्ञाविधायकं सूत्रं किम्?

११. 'स्थानेयोगा' इत्यस्य समासविग्रहः कथम्?

१२. 'स्थानेऽन्तरतमः' इत्यत्र कस्मात् सूत्रात् 'स्थान'-शब्दस्य अनुवृत्तिः सुलभा?

१३. उरण्रपरः इत्यस्मिन् 'उः' इत्यत्र प्रातिपदिकं किम्?

१४. 'अनेकाल्शित्सर्वस्य' इत्यत्र शित्करणं कां परिभाषां ज्ञापयति?

१५. आन्तर्यं कतिविधम्?

***